पूर्वमध्यमा द्वितीयखण्ड: (10वीं) वार्षिक परीक्षा - 2026

विषय कोड - 1005

समय: - होरात्रयम् साहित्यम् (सेट - II) पूर्णाङ्का: - 100

## आदर्श - उत्तराणि

प्र० 1- (1×6=6)

(i) (ब) हारादिवत् ।

(ii) उत्प्रेक्षा

(iii) (स) विभाव:

(iv) (स) दिलीपस्य

(v) (द) उपजाति:

(vi) (ब) नन्दिन्या:

प्र० 2- (1×6=6)

(i) यमकम्

(ii) स्तबकोपमा

(iii) त्रि

(iv) मनो:

(v) नन्दिनीं

(vi) दिलीपस्य उपरि

प्र० 3 (1×6=6)

| "क" स्तम्भ | "ख" स्तम्भ |
|---|---|
| (i) आवृत्तवर्णसम्पूर्णं | (घ) वृत्त्यनुप्रासवद्वच: |
| (ii) व्यञ्जक: | (च) व्यञ्जना |
| (iii) गङ्गायां घोष: | (क) प्रयोजनवती लक्षणा |
| (iv) षड्विधा | (ङ) अभिधा |
| (v) देवदारु: | (ख) वृक्ष: |
| (vi) अभिधा | (ग) मुख्यार्थ: |

/विनोद: P.T.O.

प्र॰ 4 (1×7=7)

(i) आम्

(ii) न

(iii) आम्

(iv) न

(v) आम्

(vi) आम्

(vii) आम्

---

प्र॰ 5- (1×7=7)

(i) विभावना

(ii) लक्षणायाः

(iii) प्रयोजनम्

(iv) दशममयूखे

(v) मुख्यार्थस्य

(vi) वशिष्ठः

(vii) श्लेषः

---

प्र. 6 - आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः। (2)

~~[illegible]~~

अथवा

अर्थश्लेषोऽर्थमात्रस्य यद्यनेकार्थसंश्रयः।

~~[illegible] कुन्तलस्य [illegible]~~

प्र॰ 7 - शब्दार्थयोः प्रसिद्ध्या वा कवेः प्रौढिवशेन वा। (2)
हारादिवदलङ्कारः सन्निवेशो मनोहरः॥

अथवा

चेद् बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः।

~~[illegible]~~

प्र॰8 :- हास्यरसस्य स्थायीभावः हासः भवति । (2)

अथवा

अर्थाः त्रिविधाः भवन्ति । वाच्यार्थः, लक्ष्यार्थः, व्यङ्ग्यार्थः च ।

प्र॰9 - मुख्यार्थस्याविवक्षायां पूर्वोऽर्वाचीन च रूढितः । (2)
प्रयोजनाच्च सम्बद्धं वदन्ती लक्षणा मता ॥

अथवा

धर्मं कञ्चित् पुरस्कृत्य प्रायः शब्दः प्रवर्तते ।
यथार्थं स्पष्टमाचष्टे शब्दस्तामभिधां विदुः ॥

प्र॰10 यदे लक्षणायाः उदाहरणम् यथा - "अग्नेरग्निर्नष्टः" । (2)

अथवा

आद्याशब्दशक्तिः अभिधा कथ्यते ॥

प्र॰11 - शुद्धश्लोकं दृष्ट्वा अङ्कद्वयं दद्यात् । (2)

प्र॰12 (i) केषु (2)
(ii) कस्य
(iii) कानि

प्र॰13 -
(i) सिंहः राजानम् (2)
(ii) नन्दिनी राजानम्
(iii) राजा नन्दिनीम् (गाम्)

प्र॰14 - दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्व इति नन्दिनी राजानम् आदिदेश । (2)

अथवा

दिलीपः नन्दिनीं तनयं याचते ।

प्र॰15 - प्रजानामधिपः जायाप्रतिग्राहितगन्धमाल्याम् पीतप्रतिबद्धवत्सां धेनुं वनाय मुमोच । (2)

अथवा

शिवः स्थावरजङ्गमानाम् सर्गस्थितिप्रत्यवहारहेतुः राज्ञा उक्तः ।

प्र.16 - उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।
हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव ॥ (3)

अथवा

यत्रोपमानचित्रेण सर्वथाप्युपरज्यते।
उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥

प्र.17 - समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥ (3)

अथवा

श्लेषादिभिर्विरोधश्चेत् विरोधाभासता मता।
अप्यन्धकारिणाऽनेन जगदेतत्प्रकाश्यते ॥

प्र.18 - सांमुख्यं विदधानायाः स्फुटमर्थान्तरे गिरः।
कटाक्ष इव लोलाक्ष्या व्यापारो व्यञ्जनात्मकः ॥ (3)

अथवा

वस्तु च अलङ्कारश्च वस्त्वलङ्कारौ तयोः वस्त्वलङ्कारयोः व्यक्तेः = व्यञ्जनात्, वस्त्वलङ्कारव्यञ्जनात् शब्दशक्तिजौ = शब्दशक्तिध्वनिजातौ शब्दशक्त्युद्भवौ द्वौ = द्विसंख्याकौ भेदौ भवतः तथा च वस्तुध्वनिः अलङ्कार-ध्वनिश्चेति द्वौ भेदौ शब्दशक्तिजस्येतिभावः, अर्थशक्तिसमुत्थस्य = अर्थशक्तिसमुद्भवध्वनेः भेदा द्वादश = द्वादशसंख्याकाः, भवन्ति। तत् = भेदकथनम् यथा = अग्रे लक्ष्यते।

वस्तुध्वनिमुदाहरति – पथिकः नात्र स्रस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे।
उन्नतपयोधरं प्रेक्ष्य यदि वससि तद्वस ॥

अलङ्कारध्वनेस्तूदाहरणम्

ग्रामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥

पृ. 19 - दीपनिर्वाणेऽभिलषितेऽमङ्गलभिया 'दीपं निर्वापय' इत्यनुक्त्वा

'दीपं वर्द्धय' इत्येव प्रयोगो दृश्यते प्राचीनानां शिष्टपुरुषाणाम्। एतादृश-

प्रयोगश्च वृद्ध्यर्थक वृधु धातोः व्यतिरेकसम्बन्धेन नाशे लक्षणया बोध्यः।

साक्षात् नाशार्थकधातुप्रयोगे क्रियमाणे मङ्गलपरिहाररूपप्रयोजनानुपपत्तिः।

तथा च 'दीपं वर्द्धय' इत्यत्र दीपनिर्वापणं लक्ष्यम्, अमङ्गलपरिहारपूर्वकं

मङ्गलस्योदये प्रयोजनम्, तस्य च वक्तृश्रोतृनिष्ठत्वात्तटस्थत्वम्।

दीपनिर्वापणकामनया 'दीपं वर्द्धय' इत्युच्यमाने तात्पर्यानुपपत्तौ लक्षणा।

इयं च प्रकरणादिवक्त्रादिसहकारे स्फुटं तदभावे चास्फुटमिति स्फुटा-

स्फुटयोरिदमुदाहरणम्।

लक्षकानिष्ठास्फुटप्रयोजनवत्या उदाहरणमाह - पट इति।

पटैकदेशे दग्धे 'पटोऽयं दग्धः' इति प्रयोगे कर्मानर्हताप्रतीतिः प्रयोजनं

तच्च स्फुटं नास्ति।

अथवा

अयं = पूर्वोक्तः निर्देशशब्दः = निर्देशवाचकः शब्दः, निर्देशत्वं

नाम शब्दस्य स्वपरत्वम् एतद्धि न योगादेः = न व्युत्पत्यादेः आयतनं =

स्थानं, नापि सङ्केतस्य = डित्थादिवत्सङ्केतस्य निकेतनं = स्थानम्। अतोऽयं

निर्देशो शब्दः निर्देशशब्दः = कखादिः, एवं वर्णद्वयमेवाभिधेयं यस्यां स

तया स्वाभिधेयया मुख्यया = प्रधानया वृत्या = व्यापारेण अभिधाशक्त्या

प्रतीयते इति शेषः। अतो जात्याभिर्भिन्ना अभिधाशक्तिः स्वीकार्येति

भावः।

इदमस्य तात्पर्यम् - अयं निर्देशशब्दः न यौगिकः, नापि रूढः

न च योगरूढः, न वा डित्थादिवत् कृतसङ्केतः, अपितु मुख्यया अभिधा-

वृत्या प्रतीतिमापन्न इति जात्यादिभ्यो भिन्नैवेयं षड्विधा अभिधाशक्तिः।

प्र.20- ~~सद्यः सा धेनु~~

नृपः तां धेनुं स्थितां स्थितः सन्, प्रयातां प्रस्थितः, निषेदुषीम् (3)
उपविष्टः, जलमाददानां जलाभिलाषी, इत्थं छायेव सः अनुसृतवान् इति।

अथवा

इत्थं सन्तानप्राप्त्यर्थं सुदक्षिणया सह व्रतं धारयतः महनीयकीर्तेः
~~नृपस्य~~ दीनोद्धरणक्षमस्य नृपस्य एकविंशतिदिनानि व्यतीतानि इति भावः।

~~प्रश्न- हे राजन्! एकच्छत्रं जगतः स्वामित्वम्, नवं यौवनसम्पन्नं शरीरम्, अल्पफलाय बहु त्यक्तुमिच्छस्त्वं विचारे कार्याकार्य-~~
विमर्शे मूर्खः मे प्रतिभासि।

~~अथवा~~ (3)

प्र.21- अत्र सिंहः राजानम् प्रति वदति यत् त्वं जगतः एकमेव
प्रभुः, नवयौवनसम्पन्नं शरीरं च प्राप्तवान् असि। तथापि अल्प-
प्रयोजनाय एतानि बहुमूल्यानि वस्तूनि त्यक्तुमिच्छसि। इति
विमर्शे कृते त्वं मूर्खः इव मम प्रतिभासि।

अथवा

तस्मिन् समये सिंहस्य आक्रमणं पश्यन् स्थितः, अधोमुखस्य
प्रजानां पालयितुः नृपस्य उपरि आकाशात् विद्याधरहस्तमुक्ता पुष्पवृष्टिः
संजाता इति। (4)

प्र.22 - स्वराः = अकारादयः, व्यञ्जनानि = ककारादीनि च स्वरव्यञ्जनानि
तेषां सन्दोहः = समूहः तस्य व्यूहः = आवर्तनं यस्यां सा स्वरव्यञ्जनसन्दोहव्यूहा,
मन्दः = अल्पः ऊहः = तर्कः तस्य दोहदा = जनयित्रीति मन्दोहदोहदा, जगति =
लोके जाग्रत् = जागरूकः, प्रचुरप्रचारः, उत्सेकः = उत्कर्षः यस्याः सा जाग्रज्जा-
ग्रदुत्सेका गौः = वाणी, छेकाः = विदग्धा तत्कर्तृको योऽनुप्रासः अनु =
एकदा कथनोत्तरं यत्र त एव वर्णाः पुनः प्रकर्षेण आस्यन्ते = स्थाप्यन्ते
सोऽनुप्रासः तेन भासुरा = शोभमाना भवति। यद्वा छेकाः = आलयस्थाः

पाक्षिणः तेषामनुप्रासेन = द्विर्भासितेन भासुरा। अयं च छेकैः विदग्धैः एवानुप्रयुज्यमानत्वात् छेकानुप्रास इत्युच्यते। तथा च स्वरस्तोमानां व्यञ्जनस्तोमानामुभयेषां च यत्र सकृत् साम्यं तत्र छेकानुप्रासः।

अथवा

सदृशयोः = समानयोः वाक्यार्थयोः = वाच्यवाचकयोः ऐक्यारोपः = एकतारोपणम्, निदर्शना = निश्चित्य दर्शनं = सादृश्याविष्करणं निदर्शना निदर्शनानामकोऽलङ्कारः भवति। सदृशवाक्यार्थसम्बन्धीय ऐक्यारोपः, उपमेयवाक्यार्थे उपमानवाक्यार्थारोपो निदर्शनेत्यर्थः। दातुः = दानशीलस्य पुरुषस्य या सौम्यता सा एव सुधांशोः = चन्द्रस्य, अकलङ्कता = कलङ्कशून्यता। अत्र दातुः सौम्यतारोपमेव वाक्यार्थस्य चन्द्राकलङ्कत्वरूपोपमानवाक्यार्थस्य च ऐक्यारोपो निदर्शना।

(5)

प्र-23 कारणे = निमित्ते सति = विद्यमाने कार्यस्य = फलस्य अनुत्पत्तिः = उद्भवाभावः विशेषोक्तिः = विशेषस्य अनुत्पत्तिनिमित्तस्य उक्तिः = अवगतिर्यत्रेति तद् व्युत्पत्तिः। उदाहरति- नमन्तं = नतमस्तकवन्तमपि धीमन्तं = बुद्धिमन्तं जनं कश्चन = कश्चिदपि पुरुषः न लङ्घयति = लङ्घयितुं न शक्तो भवति। अत्र सत्यपि नमनरूपकारणे लङ्घनरूपकार्यस्य अभावः प्रतिपादित इति विशेषोक्तिः।

अथवा

उपमेयतः = उपमेयात् उपमानस्य यदि हीनत्वं = न्यूनत्वं वर्णितं भवेत् तदा प्रतीपालङ्कारः। उपमेयोपमेयोपमानस्य हीनत्वप्रतिपादनेऽयमलङ्कारः। प्रतिगच्छन्त्यः अपो यस्मिन्निति प्रतीपं = निम्नोन्नतं स्थलं तत्सादृश्यादलङ्कारे लक्षणा। उदाहरति- तस्याः = रमण्याः वदनं = आननं दृष्टं = अवलोकितं तदा पद्मेन = कमलेन किम् इन्दुना = चन्द्रेण वा किं प्रयोजनम्? पद्मचन्द्रौ निष्फलौ इति भावः। प्रेयसीमुखावलोकनानन्तरं चन्द्रपद्मावलोकस्य किमपि प्रयोजनमेव नास्ति। अत्र किं पद्मेनेत्यादि कथने उपमेयान्मुखादुपमानचन्द्रयोः प्रयोजनाभावकथनेन वैयर्थ्यं प्रतिपादनात् न्यूनता प्रतिपत्त्या प्रतीपालङ्कारः।

त्रयस्त्रिंशत् भवन्ति। तेषां नामानि यथा–

(5)

प्र-24 -

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥
व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।

अथवा

उत्तममध्यमाधमभेदेन काव्यं त्रिविधं वर्तते। तत्राभिधामूललक्षणामूलत्वेन ध्वनेः द्वौ भेदौ। एतौ अविवक्षितवाच्यविवक्षितान्यपरवाच्यौ इत्युच्येते। अविवक्षितवाच्यो लक्षणामूलो ध्वनिः, विवक्षितवाच्योऽभिधामूल इत्यर्थः।

वक्तुमिष्टं विवक्षितं न विवक्षितमविवक्षितम् अविवक्षितमनुपयुक्तं वाच्यं = वाच्यार्थो यस्मिन् स अविवक्षितवाच्यः तस्य अविवक्षितवाच्यस्य = ध्वनेः द्वौ भेदौ भवतः। चेत् = यदि वाच्यमेव = अभिधेयार्थम् एव अर्थान्तरे अभिधेयातिरिक्तलक्ष्यार्थे संक्रमितं = परिणतं भवेत् वा अथवा अत्यन्तं = सर्वांशेन तिरस्कृतं = परित्यक्तं भवेत्तदार्थान्तरसंक्रमितवाच्यध्वनिः, अत्यन्ततिरस्कृतवाच्यध्वनिश्चेत्यविवक्षितवाच्यस्य ध्वनेर्द्वौ भेदौ भवतः।

(5)

प्र-25 -

सन्दर्भः – प्रस्तुतपद्यं महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् सङ्कलितम् वर्तते।

प्रसङ्गः → महाकविकालिदासेन पद्येऽस्मिन् सुदक्षिणादिलीपाभ्याम् कृतगोसपर्यायाः वर्णनं वर्तते।

अन्वयः – अथ यशोधनः प्रजानाम् अधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्यां पीतप्रतिबद्धवत्सां ऋषेः धेनुं वनाय मुमोच।

व्याख्या → अथ = निशानयनानन्तरं यशोधन: प्रजानामधिप: = प्रजेश्वर: प्रभाते = प्रातःकाले जायया = सुदक्षिणया प्रतिग्राहिते = स्वीकारिते गन्धमाल्ये यया सा जायाप्रतिग्राहितगन्धमाल्या = तथा भूतां धेनुम्। पीतं पानमस्यास्तीति पीतः पीतवानित्यर्थः। पीतः प्रतिबद्धो वत्सो यस्यास्तामृषेर्धेनुं वनाय वनं गन्तुम्। मुमोच = मुक्तवान्।

अथवा

सन्दर्भः → प्रस्तुतपद्यं महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् सङ्कलितम् वर्तते।

प्रसङ्गः → महाकविकालिदासेन पद्येऽस्मिन् ~~वृक्ष~~ देवदारुं प्रति पार्वत्याः शोकः वर्णितः।

अन्वयः → कदाचित् कटं कण्डूयमानेन वन्यद्विपेन अस्य त्वक् उन्मथिता। अथ अद्रेः तनया असुरास्त्रैः आलीढं सेनान्यम् इव एनं शुशोच।

व्याख्या → कदाचित् कटं कपोलं कण्डूयमानेन कर्षयता। वन्यद्विपेनास्य देवदारोस्त्वगुन्मथिता। अथाद्रेस्तनया गौरी असुरास्त्रैरालीढं क्षतम्। सेनां नयतीति सेनानी स्कन्दः। तमिव, एनं देवदारुं शुशोच।

(5)

प्र- 26 -

सन्दर्भः → प्रस्तुतपद्यं महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् सङ्कलितम् वर्तते।

प्रसङ्ग:→ ~~श्लोके~~ श्लोकेऽस्मिन् महाकवि कालिदासेन गां प्रति महाराजस्य दयालुतायाः वर्णनं कृतमस्ति।

अन्वय:→ देवानुचरस्य वाचं निशम्य तदध्यासितकातराक्ष्या धेन्वा निरीक्ष्यमाणः सुतरां दयालुः मनुष्यदेवः पुनः अपि उवाच।

व्याख्या→ देवानुचरस्य = शिवसेवकस्य सिंहस्य वाचं = वाणीं निशम्य = श्रुत्वा मनुष्यदेवो राजा पुनरप्युवाच। तेन सिंहेन यदध्यासितं व्याक्रमणम् तेन कातरे आक्षिणी तस्यास्तया। किं वा वक्ष्यतीति भीत्येवं स्थितयेत्यर्थः। धेन्वा निरीक्ष्यमाणः। अत एव सुतरां दयालुः सन्।

अथवा

सन्दर्भ:→ प्रस्तुतपद्यं महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् सङ्कलितम् वर्तते।

प्रसङ्ग:→ श्लोकेऽस्मिन् महाकविकालिदासेन गुरौ भक्त्या गवि अनुकम्पया च ~~०~~ वरदानोत्सुकायाः नान्दिन्याः वर्णनं कृतमस्ति।

अन्वय:→ हे पुत्र! गुरौ भक्त्या मयि अनुकम्पया च ते प्रीता अस्मि, वरं वृणीष्व। मां केवलानां पयसां प्रसूतिं न अवेहि।

किन्तु प्रसन्नां कामदुधां (अवेहि)

व्याख्या→ हे पुत्र! गुरौ भक्त्या मय्यनुकम्पया च ते तुभ्यं प्रीताऽस्मि। वरं देवेभ्यो वरणीयमर्थम्। वृणीष्व स्वीकुरु। तथापि मां केवलानां पयसां प्रसूतिं कारणं नावेहि न विद्धि। किन्तु प्रसन्नां माम् कामान्दोग्धीति कामदुधां तामवेहि।

विनोद:

प्र० 27 - दोषरहितविषयवस्तु दृष्ट्वा पञ्च अङ्काः देयाः। (5)

प्र० - 28 - दोषरहितविषयवस्तु दृष्ट्वा पञ्च अङ्काः देयाः। (5)

।विनोदः